त्र्यैहिकः, त्रि, ( ईहायां चेष्टायां भवमैहिकं धनम्। "तत्र भवः।" ४।३।५३। इति ठञ्। त्र्यहे दिनत्रये पर्य्याप्तं ऐहिकं धनं यस्य।) दिनत्रयनिर्व्वाहोचितधनयुक्तः। यथा,
"कुसूलधान्यको वा स्यात् कुम्भीधान्यक एव वा।
त्र्यैहिको वापि भवेदश्वस्तनिक एव वा॥"
इति मानवे। ४। ७॥
"कुसूलधान्यक इति। कुसूलो ब्रीह्यागारं स्यादित्याभिधानिकाः। इष्टकादिनिर्म्मितागारधान्यसञ्चयो भवेत्। अत्र कालविशेषापेक्षायाम्।
यस्य त्रैवार्षिकं भक्तं पर्य्याप्तं भृत्यवृत्तये।
अधिकं वापि विद्येत स सोमं पातुमर्हति॥
इति मनूक्त एव कालो ग्राह्यः। तेन नित्यनैमित्तिकधर्म्मकृत्यपोष्यवर्गसहितस्य गृहिणो यावता धान्यादिधनेन वर्षत्रयं समधिकं वा निर्व्वाहो भवति तावद्धनः कुसूलधान्यक उच्यते। वर्षनिर्व्वाहोचितधान्यादिधनः कुम्भीधान्यः। प्राक् सौमिकीः क्रियाः कुर्य्यात् यस्यान्नं वार्षिकं भवेदिति याज्ञवल्क्येन गृहस्थस्य वार्षिकसञ्चयाभ्यनुज्ञानात्। मनुरपि यदा वानप्रस्थस्यैव समानिचय एव वेत्यनेन समासञ्चयं वक्ष्यति तदपेक्षया बहुपोष्यवर्गस्य गृहिणः समुचितः संवत्सरसञ्चयः। मेधातिथिस्तु। यावता धान्यादिधनेन बहुभृत्यदारादिमतस्त्रिसंवत्सरस्थितिर्भवति तावत् सुवर्णादिधनवानपि कुसूलधान्यक इत्यभिधाय कुम्भी उष्ट्रिका षाण्मासिकधान्यादिनिचयः कुम्भीधान्यक इति व्याख्यातवान्। गोविन्दराजस्तु कुसूलधान्यक इत्येतद्व्याचष्ट कोष्ठप्रमाणधान्यसञ्चयो वा स्यात् द्वादशाहमात्रपर्य्याप्तधनः। कुम्भीधान्यक इत्येतद्व्याचष्टे उष्ट्रिकाप्रमाणधान्यादिसञ्चयो वा षडहमात्रपर्य्याप्तधनः।
द्वादशाहं कुसूलेन वृत्तिः कुम्भ्या दिनानि षट्।
इमाममूलां गोविन्दराजोक्तिं नानुमन्यते।
ईहा चेष्टा तस्यां भवं ऐहिकं त्र्यहपर्य्याप्तमैहिकं धनं यस्य स त्र्यैहिकः तथा वा स्यात् दिनत्रयनिर्व्वाहोचितधन इत्यर्थः। श्वोभवं श्वस्तनं भक्तं तदस्यास्तीति मत्वर्थीयमिकं कृत्वा नञ्समासः तथा वा भवेत्।" इति कुल्लूकभट्टः॥

त्र्यार्षेयाः, पुं, ( ऋषेरयं आर्षेयः। ऋषि+ढक्। त्रय आर्षेयाः ऋषिधर्म्मा नेत्रादीन्द्रियक्रियाभावरूपा येषाम्।) अन्धबधिरमूकाः। यथा।
"अत्रोक्तानि वचनानि सर्व्वाणि तिर्य्यगधिकरणन्यायमूलानि। तथा हि तिर्य्यगधिकरणे। तिर्य्यक्पङ्गुत्र्यार्षेयदेवतानामनधिकार इति याममात्रे उक्तम्। तत्र हेतवः तिरश्चां विशिष्टान्तःकरणविरहात् पङ्गोः प्रचरणविरहात् त्र्यार्षेयाणामन्धबधिरमूकानां अवेक्षणश्रवणोच्चारणविरहादिति श्रीचन्द्रशेखरवाचस्पतिकृतधर्म्मसेतु-विधिधृततिर्य्यगधिकरणम्॥ ( त्रय आर्षेया ऋषयो यत्र। त्रिप्रवरो गोत्रभेदः॥ )

त्र्याहिकः, त्रि, ( त्र्यहे भवः। त्र्यह+ठञ्।) तृतीयेऽह्नि भवः। यथा, ऐकाहिकद्व्याहिकत्र्याहिकचातुर्थिकसततज्वरविषमज्वर इत्याद्यपराजितास्तोत्रम्॥
("ऐकाहिको द्व्याहिकश्च त्र्याहिकश्च तथापरः।
वेलाज्वरश्चतुर्थोऽपि विज्ञानीयाद्विचक्षणः॥"
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये॥
अस्यौषधं यथा,—
"रसेन गन्धं प्रकुर्य्यात् शिखिग्रीवञ्च पादिकम्।
गोजिह्वया जयन्त्या च तण्डुलीयैश्च भावयेत्॥
प्रत्येकं सप्तसप्ताथ शुष्कं गुञ्जाचतुष्टयम्।
जरणेन घृतेनाद्यात् त्र्याहिकज्वरशान्तये॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे॥ )

त्र्युषणं, क्ली, ( त्रयाणां उषणानां समाहारः। पात्रादित्वात् स्त्रीत्वं न।) मिलितशुण्ठीपिप्पलीमरिचम्। इत्यमरः। २। ९। १११। ( यथा, गारुडे १९८ अध्याये।
"यमानी चित्रकं धान्यं त्र्युषणं जीरकं तथा॥")

त्र्यूषणं, क्ली, ( त्रयाणां ऊषणानां पिप्पलीमरिचशुण्ठीनां समाहारः।) त्र्युषणम्। इत्यमरटीकायां भरतः॥
("पिप्पलीमरिचं शुण्ठीत्रयमेतद्विमिश्रितम्।
त्रिकटु त्र्यूषणं त्रोषं कटुत्रयमथोच्यते॥"
इति वैद्यकपरिभाषायाम्॥
अस्य गुणा यथा,—
"त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान्।
गुल्ममेहकफस्थौल्यमेदश्लीपदपीनसान्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
( घृतविशेषः। यथा, चरके चिकित्सास्थाने २२ अध्याये।
"त्र्यूषणं त्रिफलां द्राक्षां काश्मर्य्याणि परूषकम्।
द्वे पाठे सरलं भार्गीं स्वगुप्तां चित्रकं शटीम्॥
ब्राह्मीं तामलकीं मेदां काकनासां शतावरीम्।
त्रिकण्टकां विदारीञ्च पिष्ट्वा कर्षसमं घृतात्॥
प्रस्थं चतुर्गुणं क्षीरं सिद्धं कासहरं पिबेत्।
ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत्॥
कामलार्शोऽनिलाष्ठीलाक्षतशोषक्षयापहम्।
त्र्यूषणं नाम विख्यातमेतद्घृतमनुत्तमम्॥" )

त्वं, त्रि, ( युष्मद्+सु। "त्वाहौ सौ।" ७। २। ९४। इति त्वादेशः।) भवान्। तुमि इति भाषा। युष्मच्छब्दस्य प्रथमैकवचनान्तरूपोऽयं लिङ्गत्रये समानः। इति व्याकरणम्॥

त्वः, त्रि, ( तनोति विस्तारयतीति। तन+"तनोतेरनश्च वः।" उणां। २। ६३। इति चात् क्विप् अनश्च वः। आगमानित्यत्वात् नुग्वैकल्पिकः।) भिन्नः। अन्यः। इत्यमरः। ३। १। ८२॥ ( एकः। इति निरुक्तिः। १। ७॥ यथा, ऋग्वेदे। १०। ७१। ४।
"उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः॥"
"त्वशब्द एकवाची। एकः। उतशब्दोऽप्यर्थे। पश्यन्नपि मनसा पर्य्यालोचयन्नपि वाचं न ददर्श। दर्शनफलाभावान्न पश्यति। त्व एकः शृण्वन्नप्येनां वाचं न शृणोति श्रवणफलाभावात्। इत्यनेनार्धेनाविद्वानभिहितः॥" इति तद्भाष्ये सायनः॥ )

त्वक्, [ च् ] स्त्री, ( त्वचति संवृणोति मेदःशोणितादिकमिति। त्वच संवरणे+क्विप्। यद्वा, तनोति विस्तारयतीति। तन+"तनोतेरनश्च वः।" उणां। २। ६३। इति चिक् अनश्च वः।) इन्द्रियविशेषः। यथा,—
"पूर्व्ववन्नित्यतायुक्तं देहद्व्यापि त्वगिन्द्रियम्।
प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः॥"
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम्॥
द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम्॥"
इति भाषापरिच्छेदः॥
वल्कलम्। ( यथा, रघुः। २। ३७।
"कण्डूयमानेन कटं कदाचित्
वन्यद्विपेनोन्मथिता त्वगस्य॥" )
गुड़त्वक्। (यथा, वृहत्संहितायाम्। ७७।१२।
"त्वगुशीरपत्रभागैः सूक्ष्मैलार्धेन संयुतैश्चूर्णः।
पटवासः प्रवरोऽयं मृगकर्पूरप्रबोधेन॥" )
चर्म्म। इति मेदिनी। चे, ६॥ अस्य पर्य्यायः। असृग्धरा २। इत्यमरः॥ असृग्वरा ३। इति तट्टीका॥ त्वचम् ४ त्वचा ५ चर्म्म ६ छली ७ छल्ली ८। इति शब्दरत्नावली॥ ( यथा, रघुः। ३। ३१।
"त्वचं स मेध्यां परिधाय रौरवी
मशिक्षितास्त्रं पितुरेव मन्त्रवत्।
न केवलं तद्गुरुरेकपार्थिवः
क्षितावभूदेकधनुर्द्धरोऽपि सः॥"
कञ्चुकः। यथा, मनुः। २। ७९।
"महतोऽप्येनसो मासात् त्वचेवाहिर्विमुच्यते॥")
त्वचम्। इति राजनिर्घण्टः॥ दारचिनी इति भाषा॥

त्वक्कण्डुरः, पुं, ( कण्डुं रातीति। रा+कः। त्वचः कण्डुरः।) व्रणः। इति हारावली। १५६॥

त्वक्क्षीरा, स्त्री, ( वंशत्वचः क्षीरमस्यत्र।) वंशरोचना। इत्यमरः। २। ९। १०९॥
( वंशरोचनाशब्दे विवृतिरस्या ज्ञातव्या॥ )

त्वक्क्षीरी, स्त्री, ( वंशत्वचः क्षीरमत्र। गौरादित्वात् ङीष्।) त्वक्क्षीरा। इति राजनिर्घण्टः॥ ( यथा, सुश्रुते। १। ४४।
"सिताजगन्धा त्वक्क्षीरी विदारी त्रिवृतः समाः॥"
( पर्य्यायोऽस्या यथा,—
"स्याद्वंशरोचना वांशी तुगाक्षीरी तुगा शुभा।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

त्वक्छदः, पुं, (त्वगेव छदो यस्य।) क्षीरीशवृक्षः इति रत्नमाला॥ क्षीरकञ्चुकी इति भाषा॥